ॐ

# *Srimad Valmiki Ramayana*

## Invocation

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

वागीशाध्याः सुमनसः सर्वार्थानामुपक्रमे। यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः। गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्। तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना

हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण।

भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमानासमाना

सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना॥

कूजन्तं राम रामेति मधुरं मधुराक्षरम्। आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥

यः पिबन् सततं रामचरितामृतसागरम्। अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम्॥

गोष्पदीकृतवारीशं मशकीकृत राक्षसम्। रामायणमहामालारत्नं वन्देऽनिलात्मजम्॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः।

आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम्॥

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम्।

बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम्॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्टम्।

वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि॥

आपदामपहर्तारं दातारं सर्वसम्पदाम्। लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्॥

रामाय रामभद्राय रामचन्द्राय वेधसे। रघुनाथाय नाथाय सीतायाः पतये नमः॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम्।

अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं

व्याख्यातं भरतादिभिः परिवृतं रामं भजे श्यामलम्॥

वामे भूमिसुता पुरस्तु हनुमान् पश्चात् सुमित्रासुतः

शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च।

सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्

मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम्॥

रामं रामानुजं सीतां भरतं भरतानुजम्। सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः॥

नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै।

नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरं। एकैकमक्षरं पुंसां महापातकनाशनम्॥

वाल्मीकिगिरिसम्भूता रामाम्भोनिधिसङ्गता। श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम्॥

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः। शृण्वन् रामकथानादं को न याति परां गतिम्॥

## *Benediction*

स्वस्तिः प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः।

गो ब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी। देशोयं क्षोभरहितः ब्राह्मणाः सन्तु निर्भयाः॥

अपुत्राः पौत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः।

अधनाः सधनाः सन्तु जीवन्तु शरदं शतम्॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरं। एकैकमक्षरं प्रोक्तं महापातकनाशनम्॥

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा। स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा॥

रामाय रामभद्राय रामचन्द्राय वेधसे। रघुनाथाय नाथाय सीतायाः पतये नमः॥

यन्मङ्गलं सहस्राक्षे सर्वदेवनमस्कृते। वृत्रनाशे समभवत् तत् ते भवतु मङ्गलम्॥

यन्मङ्गलं सुपर्णस्य विनताकल्पयत् पुरा। अमृतं प्रार्थयानस्य तत् ते भवतु मङ्गलम्॥

मङ्गलं कौसलेन्द्राय महनीयगुणात्मने। चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम्॥

अमृतोत्पादने दैत्यान् घ्नतो वज्रधरस्य यत्। अदितिर्मङ्गलं प्रादात् तत् ते भवतु मङ्गलम्॥

त्रीन् विक्रमान् प्रक्रमतो विष्णोरमिततेजसः। यदासीन्मङ्गलं राम तत् ते भवतु मङ्गलम्॥

ऋषयः सागरा द्वीपा वेदा लोका दिशश्च ते। मङ्गलानि महाबाहो दिशन्तु तव सर्वदा॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वा प्रकृतिस्वभावात्।

करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत्॥